# कालिदासररूपकेषु सामुद्रिकशास्त्रसन्दर्भाः

**प्रज्ञा करकरे**
शोधच्छात्रा, संस्कृतभाषा- साहित्यविभागः,
कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः, रामटेकम्

**प्रो. पराग जोशी**
मार्गदर्शकः, संस्कृतभाषा-साहित्यविभागः,
कविकुलगुरु-कालिदास-संस्कृत-विश्वविद्यालयः, रामटेकम्

**सारांशः**

त्रिस्कन्धात्मकस्य ज्योतिषशास्त्रस्य महत्त्वपूर्णम् अङ्गं वर्तते संहितास्कन्धः । अस्य स्कन्धस्यान्तर्गते सामुद्रिकशास्त्रं विद्यते । प्राचीनकाले मानवानाम् अङ्गलक्षणानुसरेण फलकथनस्य प्रचलनम् आसीत् । पूर्वकाले एषा अङ्गविद्या इति नाम्ना प्रसिद्धा किन्तु तदनन्तरं एषा विद्या सामुद्रिकशास्त्रमिति नाम्ना प्रचारितं प्रसारितञ्च । कविः स्वनाटके काव्ये वा अनेन प्रयोगेण पात्रस्य भविष्यं स्वभावञ्च निरूपयति । शोधपत्रेऽस्मिन् कालिदासरचितानि अभिज्ञानशाकुन्तलं विक्रमोर्वशीयं मालविकाग्निमित्रं नाटकत्रयाण्यपि स्वीकृतानि । त्रिषु नाटकेषु अपि प्राप्तानि अङ्गलक्षणानि सामुद्रिकशास्त्रलक्षणैः सह तुलनात्मकमध्ययनमत्र विधीयते ।

**मुख्यशब्दाः**– सामुद्रिकशास्त्रम् ,कालिदासः ,अङ्गलक्षणानि ,अभिज्ञानशाकुन्तलम्, विक्रमोर्वशीयम्, मालविकाग्निमित्रम् ।

**प्रस्तावना**

वेदपुरुषस्य निर्मलचक्षुरूपं ज्योतिषशास्त्रमिति कथ्यते । अस्य शास्त्रस्य त्रिस्कन्धाः भवति - सिद्ध◌ान्तगज्योतिषशास्त्रे जगतः शुभाशुभफलानि निरूपितानि सहोरेति । अस्मिन् वेदाङ्-संहिता-न्ति ।

**सिद्धान्तसंहिताहोरारूपं स्कन्धत्रयात्मकम् ।**
**वेदस्य निर्मलं चक्षुर्ज्योतिःशास्त्रमनुत्तमम् ॥**

**अस्य शास्त्रस्य सम्बन्धो वेदाङ्गमिति कथ्यते ।**
**अभिधेयञ्च जगतः शुभाशुभनिरूपणम् ॥**[1]

[1] नारदसंहिता प्रथमोऽध्यायः ४५-

अतः स्कन्धत्रयात्मकमिदं ज्योतिषशास्त्रम् । अत्र स्कन्धार्थः इति स्वीक्रियते । सर्वेषां ''शाखा"
''संहिता" ज्योतिषशास्त्रविषयाणां विवरणं यत्र प्रदीयते तत् इति उच्यते ।

अङ्कबीजगणितमाध्यमेन ग्रहाणां गतिः, मार्गवक्रादि ज्ञानं सिद्धान्तस्कन्धे निरूपितमस्ति । तृतीये होरास्कन्धे जातकस्य ग्रहस्थितिर्दशानुसारं फलकथनं विधीयते । यथा आचार्यवराहमिहिरेण बृहत्संहिताग्रन्थे उक्तम् -

**ज्योतिःशास्त्रमनेकभेदविषयं स्कन्धत्रयाधिष्ठितम् ।**
**तत्कात्स्न्योपनयनस्य नाम मुनिभिः सङ्कीर्त्यते संहिता ।।**

**स्कन्धेऽस्मिन् गणितेन या ग्रहगतिस्तन्त्राभिधानस्त्वसौ ।**
**होराऽन्योऽङ्गविनिश्चयश्च कथितः स्कन्धस्तृतीयोऽपरः ।।**[2]

अतत्रिस्कन्धैः सन्निहिते ज्योतिषशास्त्रेऽस्मिन् अनेकविधाः विषयाः प्रतिपादिताः सन्ति । तत्र : ग्रहगोचरं - संहितास्कन्धस्य वर्ण्यविषयाः सन्ति, ग्रहचारः संवत्सरफलानि, तिथयः, नक्षत्राणि मुहूर्तादयः। अन्यच्च सामाजिकविज्ञानं, भौगोलिकशास्त्रं, वास्तुशास्त्रं, सामुद्रिकशास्त्रं, वृष्टिविज्ञानं, भूजलस्य ज्ञानं कृषिविज्ञानं, खगोलशास्त्रं:वृक्षायुर्वेद ,, आपदः तेषां पूर्वानुमानोपायाश्च, स्वरशकुनशास्त्रञ्चेति । इत्थं हि - मनुष्याणां कृते मङ्गलपथदर्शक अस्ति अयं संहितास्कन्धः। अस्य स्कन्धस्यैव महत्त्वपूर्णम् अङ्गं वर्तते : ''सामुद्रिकशास्त्रम्" इति । अस्य शास्त्रस्याधारेण नृस्त्रीणाम् अङ्गलक्षणानि दृष्ट्वा तेषां शुभाशुभफलकथनं कर्तुं शक्यते ।

प्राचीनकालतः एव इदं सामुद्रिकशास्त्रं भारते प्रसिद्धम् । अस्य शास्त्रप्रवर्तकाः वेदव्यासः, कश्यपः:भारद्वाज ,गर्गाचार्यः ,, गौतमादयाः सन्ति । रामायणे, महाभारते अष्टादशपुराणेषु वा सामुद्रिकशास्त्रसन्दर्भाः विद्यन्ते । तर्हि विस्तृतं व्यापकञ्च भवति इदं शास्त्रम्। अस्य सामुद्रिकशास्त्रस्योद्गमविषये यन्मतं विद्वांसः स्वीकुर्वन्ति तदस्ति भगवान् विष्णुः भगवत्याः लक्ष्म्याः अङ्गसौष्ठवं, सौन्दर्यञ्च दृष्ट्वा समुद्रऋषिरूपेण अवतीर्य यद् शास्त्रं रचितं तदस्ति सामुद्रिकशास्त्रम् । सामुद्रिकशास्त्रे उक्तम् -

**इत्थं विचिन्त्य सुवरे स्वहृदि समुद्रेण सम्यगवगम्य ।**
**नृस्त्रीलक्षणशास्त्रं रचयाञ्चक्रे तदादि तथा ।।**[3]

अस्य शास्त्रस्य माध्यमेन स्त्रीनृणां दृश्यादृश्याङ्गप्रत्यङ्गास्य शुभाशुभलक्षणाधारेण तेषां भविष्यं,
स्वभावं, व्यवहारंव्यक्तित्वञ्च फलकथनं कर्तुं शक्यते । ,
फलकथनार्थं कस्याधारेण क्रियते तत् आचार्यवराहमिहिरेण बृहत्संहितायां कथितम् ।

**उन्मानमानगतिसंहतिसारवर्ण-**
**स्नेहस्वरप्रकृतिसत्त्वमनुकमादौ ।**

---

[2] बृहत्संहिता उपनयनाध्याय९ :

[3] सामुद्रिकशास्त्रम् प्रथमोऽधिकारः ८

**क्षेत्रं विधिवत्कुशलोऽवलोक्य-**
**सामुद्रविद्वदति यातमनागतं वा ।।**[4]

उन्मानं, मानं, गतिः,संहतिः सार:वर्ण :, स्निग्धता:शब्द ,, प्रकृतिः (स्वभावः(, सत्त्वं, अनूकं, क्षेत्रं, मृजाञ्चेत्यादीनामाधारेण नृस्त्रीणां फलकथनं कर्तुमत्र निर्देशितमस्ति ।

एवं प्रकारेण ज्योतिषशास्त्रे फलकथनार्थं नैकाः विधयः दृश्यन्ते तत्र एका विधिः विद्यते सामुद्रिकशास्त्रम् । एतस्य सहाय्येन अङ्गलक्षणं दृष्ट्वा भविष्यं, व्यक्तित्त्वं, चारित्र्यं कथं भवतीति परिकल्पते । संस्कृतसाहित्ये अवलोक्य एतत् ज्ञातुं शक्यते खलु कविः स्वकाव्ये पात्रस्य नायकनायिकयोः वा कृते अस्य शास्त्रस्य प्रयोगं करोति । येन पात्रस्य स्वभावः व्यवहारञ्च ज्ञायेते । तथापि सामुद्रिकशास्त्रस्य सन्दर्भाः काव्ये, नाटके वा तत्र तत्र बहुलतया प्राप्यन्ते ।

यथा अभिज्ञानशाकुन्तले राजा दुष्यन्तः शकुन्तलायाः शरीराकृतिं दृष्ट्वा तस्याः प्रशंसां करोति ।

**सरसिजमनुविद्धं शैवलेनापि रम्यं**
**मलिनमपि हिमांशोर्लक्ष्मलक्ष्मीं तनोति ।**

**इयमधिकमनोज्ञा वल्कलेनापि तन्वी**
**किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।।**[5]

इदानीं कालिदासरचितेषु अभिज्ञानशाकुन्तलम्विक्रमोर्वशीयम् ,, मालविकाग्निमित्रम् इति नाटकत्रयेषु प्राप्ताः सामुद्रिकशास्त्रसन्दर्भाः अधोलिखिताः सन्ति ।

**नेत्रलक्षणम्** –

सामुद्रिकशास्त्रानुसारं यस्याः स्त्रियाः नेत्रे मृगसदृशे स्तः यस्याः कण्ठोदरः ,ऊरुः च मृगवत् भवतः, सा कुमारी दरिद्रकुटुम्बे जातापि नृपपत्नी भवति ।

**या हरिणाक्षी हरिणग्रीवा हरिणोदरी हरिणजङ्घा ।**

**जातापि दासवंशे सा युवतिर्भवति नृपपत्नी ॥**[6]

यथा अभिज्ञानशाकुन्तलस्य नायिका शकुन्तला तथा च मालविकाग्निमित्रस्य नायिका मालविका मृगनयने नायिके स्तः ।
अभिज्ञानशाकुन्तले-

**न नमयितुमधिज्यमस्मि शक्तो धनुरिदमाहितसायकं मृगेषु ।**

**सहवसलिमुपेत्य यैः प्रियायाकृत इव मुग्धविलोकितोपदेशः ॥ :**[7]

[4] बृहत्संहिता ,पुरुषलक्षणम्१ अष्टषष्टितमोऽध्यायः ,

[5] अभिज्ञानशाकुन्तलम् १२०/

[6] सामुद्रिकशास्त्रम्४७ ,पञ्चमोऽधिकारः ,

अस्मिन् उदाहरणे राजा वदति यत् एतेषां मृगाणां नेत्राणि मम प्रियशकुन्तलायाः नेत्रयोः सादृश्यकारणात् अहं बाणैः प्रहारं कर्तुं न शक्नोमि।

शकुन्तलायाः चक्षुषोः कृते मृगनेत्राणाम् उपमा अत्र दीयते । अवश्यं शकुन्तला मृगनयनी अस्ति । यदि स्त्री मृगनयनी स्यात् सा राजपत्नी भवेदिति सामुद्रिकशास्त्रकारमतम् । शकुन्तला जन्मादेव आश्रमे पालिता । पश्चात् च राज्ञा दुष्यन्तेन सह गान्धर्वविवाहं कृत्वा राजपत्नीमभवत् ।

अनन्तरं विक्रमोर्वशीये -

**मया ज्ञातं मृगलोचनां निशाचरः कोऽपि हरति ।**
**यावन्नु नवतडिच्छयामलो धाराधरो घर्षति ॥**[8]

प्रस्तुतश्लोके राजा पुरुवा आकाशे विद्युल्लतां दृष्ट्वा मृगनयनी उर्वशी वा इति भासते । उर्वशी इन्द्रलोकस्य अप्सरा अस्ति । सा तु मर्त्यलोकराजपत्नीमभवत् ।

किन्तु एतद् विहाय मालविकाग्निमित्रं नाटके कालिदासमालविकां पद्मायताक्षी इति वर्णयति । : एकवर्षपर्यन्तं सा दासी भवति किन्तु राज्ञा अग्निमित्रेण सह विवाहोपरान्त सा सुखं भुङ्क्ते ।

यथा

**स्मयमानमायताक्ष्याः किञ्चिदभिव्यक्तदशनशोभि मुखम् ।**
**असमग्रलक्ष्यकेसरमुच्छ्वसदिव पङ्कजं दृष्टम् ॥**[9]

सामुद्रिकशास्त्रानुसारं कमललोचनी स्त्री सुखेन जीवनव्यापनं करोति ।
यथा सामुद्रिकशास्त्रे -

**नीलोत्पलदलतुल्यैरतिविमलैः सूक्ष्मपक्ष्मभिः स्निग्धै। :**
**नयनैरिवार्क कमलैर्भवन्ति सौभाग्यभोगिन्यः ॥**[10]

**पक्ष्मलक्षणम्** -
यस्याः स्त्रियाः स्थूलस्निग्धपक्ष्माणि शोभन्ते सा सौभाग्यवती भवति ।-घन-

**सुदृढैः स्निग्धैः कृष्णैः सूक्ष्मैः स्यात्पक्ष्मभिर्घनैः सुभगा ।**
**सूक्ष्मैर्विरलैः कपिलैः स्थूलैर्निन्धा ध्रुवमजाभैः ॥**[11]

यथा अभिज्ञानशाकुन्तलस्य तथा मालविकाग्निमित्रस्य वा नायिकायाघनपक्ष्माणि सन्ति । :

---

[7] अभिज्ञानशाकुन्तलम् २३/
[8] विक्रमोर्वशीयम् ४८/
[9] मालविकाग्निमित्रम् २१०/
[10]सामुद्रिकशास्त्रम् चतुर्थोऽधिकारः १६४
[11] सामुद्रिकशास्त्रम् चतुर्थोऽधिकारः १७२

**मुहुरङ्गुलिसंवृताधरोष्ठं प्रतिषेधाक्षरविक्लवाभिरामम्।**
**मुखमंसविवर्ति पक्ष्मलाक्ष्याः कथमप्युन्नमितं न चुम्बितं तु ॥[12]**
**हस्तं कम्पयते रुणद्धि रशनाव्यापारलोलाङ्गुली**
**स्वौ हस्तौ नयति स्तनावरणतामालिङ्ग्यमाना बलात्।**

**पातुं पक्ष्मलनेत्रमुन्नमयतः साचीकरोत्याननं**
**व्याजेनाप्यभिलाषपूरणसुखं निर्वर्तयत्येव मे ॥[13]**

**अधरलक्षणम्** -

यस्याः स्त्रियाः बन्धुजीवपुष्पबिम्बफलादिसदृशः रक्तवर्णः अधरः तथा च कुन्दपुष्पादीनि इव दन्ताः सन्ति, सा धनं सुखं च प्राप्नुयात्।

**बन्धुजीवकुसुमोपमोऽधरो मांसलो रुचिरबिम्बरूपभृत्।**

**कुन्दकुड्मलनिभाः समा द्विजा योषिता पतिसुखामितार्थदाः ॥[14]**

यथा अभिज्ञानशाकुन्तले तथा मालविकाग्निमित्रे शकुन्तलाया :मालविकायाः च अधरः रक्तवर्ण : बिम्बोष्ठः इति कालिदासः वर्णयति। द्वयोः अपि नायकयोअग्निमित्रदुष्यन्तयोः मालविकाशकुन्त :ले प्रति प्रबलः शुद्धः च प्रेम वर्तेते।

इत्थं हि मालविका शकुन्तला च पतिसुखं प्राप्नुतः।
यथा अभिज्ञानशाकुन्तले -

**अधरकिसलयरागः कोमलविटपानुकारिणौ बाहू। :**
**कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ॥[15]**

मालविकाग्निमित्रे -

**दाक्षिण्यं नाम बिम्बोष्ठी नायकानां कुलव्रतम्।**
**तन्मे दीर्घाक्षि ये प्राणास्ते त्वदाशानिबन्धनाः ॥[16]**

**ऊरुलक्षणम्** -

अङ्गलक्षणशास्त्रानुसारं यस्याः स्त्रियाः ऊरुः कदली इव यद्यस्ति सा राजपत्नी भवति।

**मदनगृहस्तम्भौ यौ कदलीकाण्डद्वयोपमावूरु।**
**यस्याः करिकरवृत्तावरोमशौ भूपत्नी स्यात् ॥ [17]**

[12] अभिज्ञानशाकुन्तलम् 3/22
[13] मालविकाग्निमित्रम् ४१५/
[14] बृहत्संहिता, कन्यालक्षणाध्याय६ :
[15] अभिज्ञानशाकुन्तलम् १२१/
[16] मालविकाग्निमित्रम् ४१४/
[17] सामुद्रिकशास्त्रम् चतुर्थोऽधिकारः ३८

यथा अभिज्ञानशाकुन्तले –

**किं शीतलैः क्लमविनोदिभिरार्द्रवातान्**
**सञ्चारयामि नलिनीदलतालवृन्तैः ।**

**अङ्के निधाय करभोरु यथासुखं ते**

**संवाहयामि चरणावुत पद्मताम्रौ ।।**[18]

अत्र शकुन्तलायाः ऊरुः करभसदृशः इव इति वर्णितम् अस्ति । अस्य लक्षणस्य कारणात् सा राज्ञः पत्नी अभवत् ।

अन्यच्च विक्रमोर्वशीये –

**अपराधी नामाहं प्रसीद रम्भोरु विरम संरम्भात् ।**
**सेव्यो जनश्च कुपितः कथं नु दासो निरपराधः ।।**[19]

अत्र उर्वश्याः कदलीसदृशः ऊरोः वर्णनं दृश्यते । उर्वशी इन्द्रलोकस्य अप्सरा किन्तु सा पुरुरवा राज्ञः पत्नी अभवत् ।

स्त्रियाः चतुर्भेदाः विद्यन्ते । पद्मिनी, हस्तिनीशङ्खिनी ,, चित्रिणी इति । तदनुसारं कालिदासनाटकत्रयाणामपि नायिका – प्रकारस्य वर्तते । यथा उक्तमत्र यत् ''पद्मिनी"

**स्निग्ध श्यामलकान्त्रिस्तिलकुसुमाकारसुभगनासा च ।**
**त्रिवली तरङ्गमध्या वृत्तकुचा स्निग्धकृष्णकचा ।।**

**पद्ममुखी मधुगन्धा पद्मायतलोचना प्रियालापा ।**
**बिम्बोष्ठी हंसगतिर्धर्मरतिः पद्मिनी भवति ।।**[20]

या स्त्री स्निग्धा, श्यामलकान्तिः तिलपुष्पाकारनासिकाउदरे त्रिवली ,, वृत्ताकाराः स्तनाः ,स्निग्धकेशाः , कमलमुखी, कमललोचनीरक्तवर्णः अधरः ,, हंसगतिः स्यात् सा पद्मिनी इति कथ्यते । यथा मालविकाग्निमित्रे –

**दीर्घाक्षं शरदिन्दुकान्ति वदनं बाहू नतावंसयोः**
**सङ्क्षिप्तं निबिडोन्नतस्तनमुरः पार्श्वे प्रमृष्टे इव ।**

**मध्यः पाणिमितो नितम्बि जघनं पादावरालाङ्गुली**
**छन्दो नर्तयितुर्यथैव मनसि श्लिष्टं तथास्या वपुः ।।**[21]

---

[18] अभिज्ञानशाकुन्तलम् ३।१८/

[19] विक्रमोर्वशीयम् २।२०/

[20] सामुद्रिकशास्त्रम् पञ्चमोऽधिकारः ५९, ६०

[21] मालविकाग्निमित्रम् २।३/

**अपराधिनि मयि दण्डं संहरसि किमुद्यतं कुटिलकेशि ।**
**वर्धयसि विलसितं त्वं दासजनायाद्य कुप्यसि च ।।** [22]

पद्मायतलोचनीकुटिलकेशी लावण्यवती मालविका अस्य ,बिम्बोष्ठी ,स्थूलनितम्बिनी ,उन्नतस्तनी , नाटकस्य पद्मिनीरूपा भवति।

अन्यच्च विक्रमोर्वशीये –

**असुलभा सकलेन्दुमुखी च सा किमपि चेदमनङ्गविचेष्टितम् ।**
**अभिमुखीष्विव काङ्क्षितसिद्धिषु व्रजति निर्वृतिमेकपदे मनः ।।**[23]

**सुरसुन्दरी जघनभरालसा पीनोत्तुङ्गघनस्तनी**
**स्थिरयौवना तनुशरीरा हंसगतिः ।**

**गगनोज्ज्वलकानने मृगलोचना भ्रमन्ती**
**दृष्टा त्वया तद्विरहसमुद्रान्तरादुत्तारय माम् ।।**[24]

अस्य नाटकस्य नायिका अप्सरा उर्वशी अस्ति । तस्याः सौन्दर्यम् अनौपम्यं वर्तते । इन्दुमुखी ,घनस्तनी , तन्वी ,स्थूलनितम्बिनी, क्षीणकटि हंसगतिर्युक्ता उर्वशी पद्मिनीस्त्री भवति ,।

इत्थं हि शाकुन्तले अपि शकुन्तलायाः कृते एतादृशानि एव अङ्गलक्षाणानि इतरत्र वर्णितानि । अतः सा अपि पद्मिनीस्त्री भवति इति वक्तुं शक्यते ।

सामुद्रिकशास्त्रानुसारं स्वभावः ज्ञातुं शक्यते । शास्त्रेऽस्मिन् देवादिभेदानुसारं द्वादशप्रकृतयः चर्चिताः। तत्र एका प्रकृतिः विद्यते गन्धर्वस्वभावा स्त्री इति । मालविका गन्धर्वस्वभावा नायिका दृश्यते । अस्याः प्रकृतेः लक्षणं यथा –

**उद्यानवनासक्ता कलस्वरा गीतनृत्यरक्तमनाः ।**
**परिचितसुगन्धमाल्या गन्धर्वप्रकृतिरबला सा ।।**[25]

एतद् लक्षणानुसारं नाटके अपि दृश्यते यत् मालविकायाः नृत्याचार्यः गणदासः तस्याः नृत्यस्य कौतुकं करोति । मालविकायाः नृत्ये वैलक्षण्यं दृष्ट्वा आचार्यः स्वात्मानं धन्यं मन्यते । द्वितीये अङ्के सा एकं पद्यमपि गायति ।

**यद्यत्प्रयोगविषये भाविकमुपदिश्यते मया तस्यै ।**
**तत्तद्विशेषकरणात्प्रत्युपदिशतीव मे बाला ।।**[26]

---

22 मालविकाग्निमित्रम् ३२२/

23 विक्रमोर्वशीयम् २९/

24 विक्रमोर्वशीयम् ४५९/

25 सामुद्रिकशास्त्रम् पञ्चमोऽधिकारः ३५

26 मालविकाग्निमित्रम् १५/

मालविकायाः गीतम् –

**दुर्लभः प्रियो मे तस्मिन्भव हृदय निराश-**
**महो अपाङ्गो मे परिस्फुरति किमपि वामः ।**

**एष च चिरदृष्टः कथं पुनरुपनेतव्यो**
**नाथ मां पराधीनां त्वयि परिगणय सतृष्णाम् ।।**[27]

**उपसंहारः**–

सामुद्रिकशास्त्रस्याधारेण मानवाः अङ्गप्रत्यङ्गानुसारं भविष्यकथनंस्वभाववर्णनञ्च ज्ञातुं शक् ,नुवन्ति । अस्य शास्त्रस्य प्रयोगेण कालिदासः पात्रस्य सौन्दर्यं स्वभावं च निरूपयति । यतो हि नाटकस्य उदाहरणानि अवलोक्य तेषां अङ्गलक्षणैः सह तौलनम् अत्र विधीयते । सामुद्रिकशास्त्रे यत् फलं प्रदीयते तदेव लक्षणस्य फलानुसारं नाटके भविष्यति तथा च पात्रस्य स्वभावे तद्गुणाः दृश्यन्ते एव । अतः कविः स्वकाव्ये पात्रस्य भविष्यकथनायस्वभाववर्णनाय ,, सौन्दर्यस्य कृते सामुद्रिकशास्त्रस्य प्रयोगं करोति इति वक्तुं शक्यते ।

**सन्दर्भग्रन्थसूची –**


१) **”अभिज्ञानशाकुन्तलम्“**कालिदासः ,चन्द्रकलाव्याख्या –चौखम्बा सुरभारती प्रकाशन, वाराणसी

२) **”मालविकाग्निमित्रम्“**कालिदासः निर्णयसागराख्यमुद्रणालयम् –, मुम्बापुरी

३) **”विक्रमोर्वशीयम्“**कालिदासः निर्णयसागराख्यमुद्रणालयम् ,कल्पलताख्यव्याख्या –, मुम्बापुरी

४) **”सामुद्रिकशास्त्रम्“**कालिदासः चौखम्बा सुरभारती प्रकाशन ,अभयकात्यायानस्य टीका –, वाराणसी

५) **बृहत्संहित“ा ”**वराहमिहिरः वाराणसी ,चौखम्बा विद्याभवन –

६) **“संस्कृत-वाङ्मय का बृहद् इतिहास षोडश-खण्ड ज्योतिषशास्त्र” -** स्व. पद्मभूषण आचार्य श्री बलदेव उपाध्याय - उत्तर प्रदेश संस्कृत संस्थान, लखनऊ

७) **“नारदसंहिता”**– श्रीवेङ्कटेश्वरमुद्रणालयम् ,मुम्बापुरी


[27] मालविकाग्निमित्रम् २४/